https://www.mpboardonline.com

# पुनरावृत्ति परीक्षा (रिविजन टेस्ट) 2020

कक्षा : दशमी (10वीं )
विषय :– संस्कृतम् (सामान्यम्)

समय :– घण्टात्रयम् पूर्णाङ्काः 100

**प्रश्नः 1 उचितविकल्पं चित्वा लिखत –** 05

1. "पुस्तकालयः" पदे सन्धिः अस्ति –
   (अ) गुणसन्धिः (ब) दीर्घसन्धिः
   (स) वृद्धिसन्धिः (द) अयादिसन्धिः
2. " सूर्य+उदयः " इत्यस्य सन्धिः अस्ति –
   (अ) सूर्यदयः (ब) सूर्यादयः
   (स) सूर्योदयः (द) सूर्य उदयः
3. अधोलिखितेषु व्यञ्जनसन्धिः अस्ति –
   (अ) जगदीशः (ब) गायकः
   (स) कपीशः (द) प्रत्येकः
4. "सदैव" पदे सन्धिः अस्ति –
   (अ) गुणसन्धिः (ब) दीर्घसन्धिः
   (स) वृद्धिसन्धिः (द) अयादिसन्धिः
5. "गुरोरादेशः" पदस्य सन्धिविच्छेदः अस्ति –
   (अ) गुरुः+आदेशः (ब) गुरोः+आदेशः
   (स) गुरोर+ आदेशः (द) गुरो आदेशः

**प्रश्नः 2 उचितविकल्पं चित्वा लिखत –** 04

1. "पञ्चवटी" पदे समासः अस्ति –
   (अ) द्वन्द्वसमासः (ब) बहुव्रीहिसमासः
   (स) द्विगुसमासः (द) कर्मधारयसमासः
2. अधोलिखितेषु बहुव्रीहिसमासः अस्ति –
   (अ) पीताम्बरः (ब) प्रतिदिनम्
   (स) हरिहरौ (द) रामभक्तः
3. "राजपुरुषः" पदस्य समासविग्रहः अस्ति –
   (अ) राजः पुरुषः (ब) पुरुषः राजः
   (स) पुरुषः राज्ञः (द) राज्ञः पुरुषः
4. अधोलिखितेषु द्वन्द्वसमासः अस्ति –
   (अ) घनश्यामः (ब) त्रिभुवनम्
   (स) रामलक्ष्मणौ (द) दशाननः

**प्रश्नः 3 उचितविकल्पं चित्वा लिखत –** 05

1. "अभवत्" पदे लकारः अस्ति –
   (अ) लट्लकारः (ब) लङ्लकारः
   (स) लोट्लकारः (द) लृट्लकारः
2. "पास्यामि" पदे लकारः अस्ति –
   (अ) लट्लकारः (ब) लङ्लकारः
   (स) लोट्लकारः (द) लृट्लकारः
3. "गच्छन्तु" पदे पुरुषः अस्ति –
   (अ) प्रथमपुरुषः (ब) मध्यमपुरुषः
   (स) उत्तमपुरुषः (द) नञ्तत्पुरुषः
4. "भवावः" पदे वचनम् अस्ति –
   (अ) एकवचनम् (ब) द्विवचनम्

https://www.mpboardonline.com
https://www.mpboardonline.com
https://www.mpboardonline.com

(स) बहुवचनम् (द) अन्यवचनम्

5. "पश्यति" पदे धातुः अस्ति –

(अ) दृश् (ब) पश्

(स) पा (द) पाश्

**प्रश्नः 4 उचितविकल्पं चित्वा लिखत –** **04**

1. अधोलिखितेषु तुमुन् प्रत्ययः अस्ति –

(अ) पठित्वा (ब) क्रीडितुम्

(स) हसितवान् (द) गतः

2. "दत्वा" पदे प्रत्ययः अस्ति –

(अ) त्वा (ब) क्त

(स) क्त्वा (द) ल्यप्

3. "क्तवतु" प्रत्ययस्य उदाहरणम् अस्ति –

(अ) कृतवान् (ब) खादितः

(स) कर्तुम् (द) हसित्वा

4. अधोलिखितेषु "शतृ" प्रत्ययः अस्ति –

(अ) खादितवान् (ब) सेवमानः

(स) पठन् (द) गमनीयम्

**प्रश्नः 5 श्लोकपंक्तिपूर्ति कुरूत –** **02**

1. केयूरा न विभूषयन्ति ...........................।
2. केतकीगन्धमाघ्राय................षट्पदाः।

**प्रश्नः 6 प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –** **05**

( नीडानि, मार्गायासं, अनिलं, चक्रम्य, सूर्यदेवः )

1. शाखान्तरं.....................एकः कीटः अवदत्।
2. पक्षिणः शाखासु................विरच्य वसन्ति स्म।
3. ......................प्रकाशं प्रयच्छति
4. पथिकाः .................. परिहरन्ति स्म।
5. वायुः ...................... ददाति।

**प्रश्नः 06 अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत –** **06**

1. प्रकृतिदत्तः वरः कः ?
2. महर्षि कस्य स्थापनां कृतवान् ?
3. सर्वोत्तमं भूषणं किम् अस्ति ?
4. पुरुषादः कः आसीत् ?
5. मार्कण्डेयः नाम ऋषिः कुत्र वसति स्म ?
6. भारतस्य प्रथम प्रधानमन्त्री कः आसीत् ?

**प्रश्नः 7 अधोलिखितशब्दानां रूपाणि त्रिषु वचनेषु लिखत –** **04**

1. राम – चतुर्थी विभक्तिः
2. साधु – पञ्चमी विभक्तिः
3. रमा – तृतीया विभक्तिः
4. राजन् – द्वितीया विभक्तिः

**प्रश्नः 8 अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत –** **10**

**(1)** कस्मिंश्चित् ग्रामे एकः प्राचीनः विशालः च न्यग्रोधवृक्षः आसीत्। सः पशुपक्षिभ्यः, बहुविधेभ्यः जीवजन्तुभ्यः, मनुष्येभ्यः अपि नित्यं बहूपकारकः आसीत्। पथिकाः तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म। पक्षिणः तस्य शाखासु नीडानि विरच्य वसन्ति स्म।

https://www.mpboardonline.com

https://www.mpboardonline.com

(क) न्यग्रोधवृक्षः केभ्यः नित्यं बहूपकारकः आसीत् ?
(ख) पथिकाः वृक्षस्य छायायां किम् कुर्वन्ति स्म ?
(ग) के छायार्थं वृक्षमिमम् आश्रयन्ति स्म ?
(घ) पक्षिणः तस्य शाखासु कानि विरच्य वसन्ति स्म ?
(ङ) कस्मिंश्चित् ग्रामे एकः कः आसीत् ?

**(2)** वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते" इति अवदन्। ते सर्वे परोपकारिणः।

(क) वृक्षस्य आधारभूता का अस्ति ?
(ख) वायुः किं ददाति ?
(ग) कः वृष्टिं वर्षति ?
(घ) सूर्यदेवः किं प्रयच्छति ?
(ङ) ते सर्वे वृक्षं किं कुर्वन्ति ?

**प्रश्नः 9 अधोलिखितेषु पद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत –** **10**

**(1)** गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः।।

(क) शशी किं हन्ति ?
(ख) गङ्गा किं हन्ति ?
(ग) पापं तापं दैन्यं च के घ्नन्ति ?
(घ) कल्पतरुः किं हन्ति ?
(ङ) "कल्पतरुस्तथा" पदस्य कः सन्धिविच्छेदः ?

**(2)** दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानै–
र्दानं हि सर्वव्यसनानि हन्ति।।

(क) दानेन कानि नाशं यान्ति ?
(ख) कैः परोऽपि बन्धुत्वम् उपैति ?
(ग) दानं कानि हन्ति ?
(घ) दानेन कानि वशीभवन्ति ?
(ङ) उपैति" पदे कः सन्धिः ?

**प्रश्नः 10 युग्ममेलनं कुरूत –** **04**

| (अ) | | (ब) |
|---|---|---|
| (क) येन कर्मण्यपसो | – | भूषणम् |
| (ख) वरुणदेवः | – | मनीषिणो |
| (ग) दयानन्दः विशेषतः अशिक्षत | – | घटोत्कचः |
| (घ) वाग्भूषणम् | – | योगपद्धतिम् |

**प्रश्न 11 शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं " न " इति लिखत –** **04**

- वृक्षाणां छेदनम् महत्पापम्।
- सूर्यदेवः वृष्टिं वर्षति।
- दयानन्दः सामाजिककुप्रथानां निवारणं कृतवान्।
- महर्षिसदृशाः महात्मानः वन्द्याः न भवन्ति।

**प्रश्नः 12 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत –** **04**

1. दयानन्दः केषां प्रचारमकरोत् ?
2. कः जीवन्नपि मृतः एव ?
3. सन्तः कानि घ्नन्ति ?



https://www.mpboardonline.com
https://www.mpboardonline.com

4. सुतापेक्षी कः आसीत् ?

**प्रश्नः 13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत– 04**

**प्रश्नः 14 स्वस्य प्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत– 04**

**अथवा**

**स्वस्य मित्रस्य कृते शुभकामनापत्रं संस्कृते लिखत–**

**प्रश्नः 15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीया – 05**

1. श्रीगणेशं नमः
2. जलस्य विना मीनः न जीवति।
3. वृक्षेण पत्राणि पतन्ति।
4. मोहनः भिक्षुकं धनं ददाति।
5. गुरूं नमः।

**प्रश्नः 16 अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत – 05**

**(1)** (क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

(ख) गङ्गातीरे मार्कंडेयः नाम कश्चन मुनिः वसति स्म।

(ग) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

(घ) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(ङ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

(च) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

**प्रश्नः 17 अधोलिखित–अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 05**

**(अ)** शरीरं धर्मस्य प्रथमं साधनम् अस्ति–"शरीरमाद्यं खलु धर्मसाधनम्"। शरीरस्य आरोग्यं व्यायामेन सिध्यति। यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति। इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति। जठराग्निः दीप्तः भवति। परिवृद्धम् उदरं सङ्कोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः।

(1) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत –

(2) धर्मस्य प्रथमं साधनं किम् अस्ति ?

(3) कीदृशम् उदरं व्यायामेन सङ्कोचं गच्छति ?

(4) अस्य गद्यांशस्य सारं लिखत।

(5) "गच्छन्ति" इति पदे कः धातुः अस्ति ?

**प्रश्नः 18 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु सरल–संस्कृत–भाषायां निबन्धं लिखत– 10**

(1) महाकविः (कालिदासः) (2)उत्सवः (दीपावलिः)

(3) संस्कृतभाषायाः महत्त्वम् (4) अनुशासनम्

..........+..........+..........+..........

https://www.mpboardonline.com

https://www.mpboardonline.com